(b) Explain the appropriateness of the title of the drama Svapnavasavadattam of Bhāsa in making referance to the incidents of the drama.

= नाट्यसाहित्ये महाकविभासस्य महती प्रसिद्धिरस्ति, अन्येषां नाटककाराणां का कथा ? स्वयं महाकविः कालिदासोऽपि भासस्य वैशिष्ट्यं मुक्तकण्ठेन स्वीकरोति मालविकाग्निमित्रस्य प्रस्तावनायां स्पष्टमुक्तं सूत्रधारेण प्रथितयशसां भाससौमिल्ल कविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्तमानस्य कवेः कालिदासस्य कृतौ बहुमानः, अनेन ज्ञातेन यत् कालिदासस्य समये भासस्य महती प्रसिद्धिरासीदिति, अस्य कृतयः सर्व साधारणजनेषु विख्याता आसान्, अत एव कालिदासस्य कमनीयनाटकमपि जनाः समादरेण नावलोकयन्ति स्म।

कालिदासस्य परवर्तिनः स्यादौ भासस्यातिप्रशंसा कृता,

सूत्रधारकृतारम्भौः नाटकैर्बहुभूमिकैः।
सपताकैर्यशो, भासो देवकुलैरिव ॥

महाकविः राजशेखरस्तु एवं लिखति यत् यदा नाटक सपरीक्षा जाता तदा भासस्य नाटकचक्रं प्रज्वलितेषु वह्निषु प्रक्षिप्तं परन्तु स्वप्नवासवदत्तस्य दाहकः पावकोऽपि

नाभूत् ।

भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम् ,
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥

स्वप्नवासवदत्ते कविः भासः पात्राणं चरित्रचित्रणे नाट्य कलायाः अद्भुतं चित्रं चित्रयति, विशुद्धस्य विशदप्रेम्णः यादृशं वर्णनं भासेन कृतं, तादृशं संस्कृतसाहित्ये सुदुर्लभम् नितान्त ।

स्मित नाटकीय घटनानामीदृशं मनोहरत्वं प्राप्यते, यत् अस्वाभाविकतायाः दर्शनमेव कुत्रापि न भवति।

स्वप्नवासवदत्तम संस्कृतसाहित्यस्य अनुपमानं महार्हरत्न विद्यते इति नात्र संशयः। नाटकमिदं यथैव साहित्यिक-दृष्ट्या महत्वास्पदं तथैव व्यावहारिकदृष्ट्यापि परमोच्चस्थानं लभते।

यौगन्धरायणो हि आदर्शमन्त्री, सदैव राज्ञः राज्यस्य च सुरक्षां चिन्तयति, निजकर्तव्यपालनार्थं राज्ञः प्रियं कर्तुं यौगन्धरायणः पराजयितुं दर्शकस्य सहायताऽत्यावश्यकीति ज्ञात्वा तेन कौशलेन पद्मावत्या सह वत्सराजस्य विवाहः विहितः। विजयानन्तरं सः पुनः राज्ञः समीपे वासवदत्ताम् आनयति।

नाटकेऽस्मिन् भासस्य भाषा विचित्रास्ति। लघ्वपि वाक्यं विचित्रं भावार्थं द्योतयति। भासस्य कविता-कामिता पदविन्यासेषु यादृशो प्रकर्षं स्थानं यजते तादृशमेव भावप्रकाशनेऽपि।

भासः मानव-हृदय-विकार-मर्मज्ञः, प्रकृतिवर्णनस्य महान् शिल्पी रसालङ्कारयोः कलापक्षस्य च प्रियः कविरिति प्रतिभाति।

किमधिकं स्वप्नवासवदत्ते भासस्य शैली नितरां प्रशंसनीयेति निश्चप्रचम्।